प्राध्यापक (संस्कृत शिक्षा) प्रतियोगी परीक्षा–2020

पुस्तिका में पृष्ठों की संख्या : 16
Number of Pages in Booklet : 16

पुस्तिका में प्रश्नों की संख्या : 150
No. of Questions in Booklet : 150

**Paper Code : 09**

**Sub: Nyaya Darshan**

प्रश्न-पत्र पुस्तिका संख्या / Question Paper Booklet No.

8207453

# LSK-02

परीक्षा दिनांक :- 18/12/2020
समय :- 02:00PM TO 05:00 PM

समय : 3.00 घण्टे
Time : 3.00 Hours

**PAPER-II**

अधिकतम अंक : 300
Maximum Marks : 300

**प्रश्न-पत्र पुस्तिका एवं उत्तर पत्रक के पेपर सील/पॉलिथीन बैग को खोलने पर परीक्षार्थी यह सुनिश्चित कर लें कि उसके प्रश्न-पत्र पुस्तिका पर वही प्रश्न-पत्र पुस्तिका संख्या अंकित है जो उत्तर पत्रक पर अंकित है । इसमें कोई भिन्नता हो तो परीक्षार्थी वीक्षक से दूसरा प्रश्न-पत्र प्राप्त कर लें । ऐसा सुनिश्चित करने की जिम्मेदारी अभ्यर्थी की होगी ।**

**On opening the paper seal/polythene bag of the Question Paper Booklet the candidate should ensure that Question Paper Booklet No. of the Question Paper Booklet and Answer Sheet must be same. If there is any difference, candidate must obtain another Question Paper Booklet from Invigilator. Candidate himself shall be responsible for ensuring this.**

## परीक्षार्थियों के लिए निर्देश

1. **सभी** प्रश्नों के उत्तर दीजिए ।
2. **सभी** प्रश्नों के अंक समान हैं ।
3. प्रत्येक प्रश्न का केवल **एक** ही उत्तर दीजिए ।
4. एक से अधिक उत्तर देने की दशा में प्रश्न के उत्तर को गलत माना जाएगा ।
5. प्रत्येक प्रश्न के चार वैकल्पिक उत्तर दिये गये हैं, जिन्हें क्रमश: 1, 2, 3, 4 अंकित किया गया है । अभ्यर्थी को सही उत्तर निर्दिष्ट करते हुए उनमें से केवल एक गोले अथवा बबल को उत्तर पत्रक पर **नीले बॉल प्वाइंट पेन** से गहरा करना है ।
6. **OMR** उत्तर पत्रक इस परीक्षा पुस्तिका के अन्दर रखा है । जब आपको परीक्षा पुस्तिका खोलने को कहा जाए, तो उत्तर-पत्रक निकाल कर ध्यान से केवल **नीले बॉल पॉइंट पेन** से विवरण भरें ।
7. **प्रत्येक गलत उत्तर के लिए प्रश्न अंक का 1/3 भाग काटा जायेगा ।** गलत उत्तर से तात्पर्य अशुद्ध उत्तर अथवा किसी भी प्रश्न के एक से अधिक उत्तर से है । किसी भी प्रश्न से संबंधित गोले या बबल को खाली छोड़ना गलत उत्तर नहीं माना जायेगा ।
8. मोबाइल फोन अथवा इलेक्ट्रोनिक यंत्र का परीक्षा हॉल में प्रयोग पूर्णतया वर्जित है । यदि किसी अभ्यर्थी के पास ऐसी कोई वर्जित सामग्री मिलती है तो उसके विरुद्ध आयोग द्वारा नियमानुसार कार्यवाही की जायेगी ।
9. कृपया अपना रोल नम्बर ओ.एम.आर. पत्रक पर सावधानीपूर्वक सही भरें । गलत अथवा अपूर्ण रोल नम्बर भरने पर **5 अंक** कुल प्राप्तांकों में से काटे जा सकते हैं ।

**चेतावनी** : अगर कोई अभ्यर्थी नकल करते पकड़ा जाता है या उसके पास से कोई अनधिकृत सामग्री पाई जाती है, तो उस अभ्यर्थी के विरुद्ध पुलिस में प्राथमिकी दर्ज कराते हुए विविध नियमों-प्रावधानों के तहत कार्यवाही की जाएगी । साथ ही विभाग ऐसे अभ्यर्थी को भविष्य में होने वाली विभाग की समस्त परीक्षाओं से विवर्जित कर सकता है ।

## INSTRUCTIONS FOR CANDIDATES

1. Answer **all** questions.
2. **All** questions carry equal marks.
3. Only **one** answer is to be given for each question.
4. If more than one answers are marked, it would be treated as wrong answer.
5. Each question has four alternative responses marked serially as **1, 2, 3, 4**. You have to darken only one circle or bubble indicating the correct answer on the Answer Sheet using **BLUE BALL POINT PEN**.
6. The **OMR** Answer Sheet is inside this Test Booklet. When you are directed to open the Test Booklet, take out the Answer Sheet and fill in the particulars carefully with **blue ball point pen** only.
7. **1/3 part of the mark(s) of each question will be deducted for each wrong answer.** A wrong answer means an incorrect answer or more than one answers for any question. Leaving all the relevant circles or bubbles of any question blank will not be considered as wrong answer.
8. Mobile Phone or any other electronic gadget in the examination hall is strictly prohibited. A candidate found with any of such objectionable material with him/her will be strictly dealt as per rules.
9. Please correctly fill your Roll Number in O.M.R. Sheet. **5 Marks** can be deducted for filling wrong or incomplete Roll Number.

**Warning :** If a candidate is found copying or if any unauthorized material is found in his/her possession, F.I.R. would be lodged against him/her in the Police Station and he/she would liable to be prosecuted. Department may also debar him/her permanently from all future examinations.

**इस परीक्षा पुस्तिका को तब तक न खोलें जब तक कहा न जाए ।**
**Do not open this Test Booklet until you are asked to do so.**

1. तमः दृशमं द्रव्यमिति कः स्वीकरोति ?
(1) प्रभाकरः
(2) नैयायिकः
(3) वैशेषिकः
(4) न कोऽपि

2. रेचनस्य कुत्र अन्तर्भावः ?
(1) गमने
(2) अपक्षेपणे
(3) प्रसारणे
(4) कर्मणि

3. विशेषः कुत्र तिष्ठति ?
(1) घटे
(2) कपाले
(3) परमाणौ
(4) न कुत्रापि

4. पृथिव्यां गन्धः केन सम्बन्धेन तिष्ठति ?
(1) कालिकेन
(2) स्वरूपेण
(3) तादात्म्येन
(4) समवायेन

5. पार्थिवमिन्द्रियं किम् ?
(1) रसना
(2) घ्राणम्
(3) चक्षुः
(4) श्रोत्रम्

6. 'औदर्यम्' कस्य भेदः ?
(1) जलस्य
(2) पृथिव्याः
(3) तेजसः
(4) इन्द्रियस्य

7. शब्दः कस्य गुणः ?
(1) वायोः
(2) जलस्य
(3) पृथिव्याः
(4) आकाशस्य

8. पृथिवीपरमाणौ रूपं कीदृशम् ?
(1) अपाकजम्
(2) पाकजम्
(3) उभयम्
(4) नोभयम्

9. शब्दत्वप्रत्यक्षे कः सन्निकर्षः ?
(1) समवायः
(2) संयुक्तसमवायः
(3) संयुक्तसमवेतसमवायः
(4) समवेतसमवायः

10. पञ्चावयवमध्ये कस्य गणना अस्ति ?
(1) पक्षस्य
(2) सपक्षस्य
(3) उपनयस्य
(4) विपक्षस्य

11. शब्दः अनित्यः चाक्षुषत्वात् इत्यत्र कः हेत्वाभासः ?
(1) बाघः
(2) सत्प्रतिपक्षः
(3) स्वरूपासिद्धः
(4) व्याप्यत्वासिद्धः

12. तर्कः कस्य भेदः ?
(1) संशयस्य
(2) विरोधस्य
(3) विपर्ययस्य
(4) अयथार्थानुभवस्य

13. पर्वत: वह्निमान् प्रमेयत्वात् इत्यत्र क: हेत्वाभास: ?
(1) विरुद्ध:
(2) आश्रयासिद्ध:
(3) साधारण:
(4) बाघ:

14. यथार्थानुभव: प्रमा इति प्रमालक्षणे अनुभवपदं कुत्र दोषवारणाय प्रदत्तम् ?
(1) संशये
(2) तर्के
(3) स्मृतौ
(4) विपर्यये

15. कार्यानुकृतान्वयव्यतिरेकिकारणमिति कारणलक्षणं केषां मते ?
(1) मीमांसकमते
(2) वैशेषिकमते
(3) नैयायिकमते
(4) वैयाकरणमते

16. पटात्मकस्य कार्यस्य असमवायिकारणं किम् ?
(1) तन्तु:
(2) तुरीतन्तुसंयोग:
(3) तुरीपटसंयोग:
(4) तन्तुसंयोग:

17. तर्कभाषारीत्या साक्षात्कारिणी प्रमा कतिविधा ?
(1) त्रिविधा
(2) चतुर्विधा
(3) द्विविधा
(4) षड्विधा

18. हानोपादानादिबुद्धिरूपफलोत्पत्तौ करणं किम् ?
(1) निर्विकल्पकम्
(2) सविकल्पकम्
(3) इन्द्रियार्थसन्निकर्ष:
(4) इन्द्रियम्

19. आत्मविषयकमानस् – 'अहम्' इत्याकारकप्रत्यक्षे क: सन्निकर्ष: ?
(1) समवाय:
(2) संयुक्तसमवाय:
(3) संयोग:
(4) न कोऽपि

20. इह भूतले घटो नास्ति इत्यत्र विशेषणं किम् ?
(1) घट:
(2) घटाभाव:
(3) भूतलम्
(4) घट: भूतलश्च

21. क्रत्वन्तर्वर्तिनी हिंसा अधर्मजनिका इत्यत्र क: उपाधि: ?
(1) हिंसात्वम्
(2) अधर्मजनकत्वम्
(3) निषिद्धत्वम्
(4) हिंसा

22. तर्कभाषाकार मते अनुमानं कतिविधम् ?
(1) चतुर्विधम्
(2) षड्विधम्
(3) पञ्चविधम्
(4) द्विविधम्

23. पर्वत: वह्निमान् धूमादित्यत्र धूम: कीदृश: हेतु: ?
(1) केवलान्वयि
(2) अन्वयव्यतिरेकि
(3) केवलव्यतिरेकि
(4) कोऽपि अन्य:

24. केवलव्यतिरेकिहेतौ इदं न भवति –

(1) पक्षसत्वम्

(2) विपक्षव्यावृत्तिः

(3) असत्प्रतिपक्षत्वम्

(4) सपक्षसत्वम्

25. वह्निना सिञ्चति इति वाक्यं न शाब्दबोधजनकम्, कथम् ?

(1) आकांक्षाभावात्

(2) सान्निध्याभावात्

(3) योग्यताभावात्

(4) आसत्तेरभावात्

26. अर्थापत्तेः प्रमाणान्तरत्वं कः स्वीकरोति ?

(1) नैयायिकः

(2) प्रभाकरः

(3) बौद्धः

(4) वैशेषिकः

27. अनुपलब्धिः स्वतन्त्रं प्रमाणमस्तीति कः स्वीकरोति ?

(1) वेदान्ती

(2) नैयायिकः

(3) बौद्धः

(4) प्रभाकरः

28. ज्ञानगतं प्रामाण्यमप्रामाण्यञ्च परतः एव गृह्यते इति कस्य मतम् ?

(1) सांख्यमतम्

(2) मीमांसकमतम्

(3) बौद्धमतम्

(4) न्यायमतम्

29. तर्कभाषानुसारं प्रमेयं कतिविधम् ?

(1) चतुर्दशविधम्

(2) एकादशविधम्

(3) षड्विधम्

(4) द्वादशविधम्

30. शरीरसंयुक्तं ज्ञानकरणमतीन्द्रियमिन्द्रियम् इत्यत्र ज्ञानकरणपदं कुत्र दोषवारणाय प्रदत्तम् ?

(1) इन्द्रियसन्निकर्षे

(2) आलोके

(3) काले

(4) इन्द्रिये

31. त्र्यणुकारम्भः कथं भवति ?

(1) त्रिभिः द्वयणुकैः

(2) त्रिभिः परमाणुभिः

(3) द्वाभ्यां परमाणुभ्याम्

(4) द्वाभ्यां द्वयणुकाभ्याम्

32. संख्यादयः पञ्चैव गुणाः कुत्र सन्ति ?

(1) जले

(2) आकाशे

(3) काले

(4) वायौ

33. पृथिवीजलयोः अयं गुणः तिष्ठति –

(1) गन्धः

(2) गुरुत्वम्

(3) स्नेहः

(4) शब्दः

34. त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः इति कस्य वचनम् ?
(1) गौतमस्य
(2) वात्स्यायनस्य
(3) भर्तृहरेः
(4) न कस्यापि

35. "सामान्यतोदृष्टम्" कस्य भेदः ?
(1) अनुमितेः
(2) उपमितेः
(3) उपमानस्य
(4) अनुमानस्य

36. प्रसिद्धसाधर्म्यात् साध्यसाधनं किमुच्यते ?
(1) उपमानम्
(2) अनुमितिः
(3) उपमितिः
(4) अनुमानम्

37. अयमात्मसाधको हेतुः न भवति –
(1) द्वेषः
(2) दुःखम्
(3) इच्छा
(4) वेगः

38. भूतपदेन कस्य ग्रहणं न भवति ?
(1) पृथिव्याः
(2) मनसः
(3) जलस्य
(4) वायोः

39. न्यायदर्शने सिद्धान्तस्य कति भेदाः ?
(1) त्रयः
(2) पञ्च
(3) अनन्ताः
(4) चत्वारः

40. यत्सिद्धौ अन्यप्रकरणसिद्धिः तादृशः सिद्धान्तः कः ?
(1) अधिकरणसिद्धान्तः
(2) प्रकरणसिद्धान्तः
(3) अभ्युपगमसिद्धान्तः
(4) अन्यः सिद्धान्तः

41. हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनमिति कस्य लक्षणम् ?
(1) हेतोः
(2) उपनयस्य
(3) निगमनस्य
(4) उदाहरणस्य

42. प्रमाणतर्कसाधनोपालम्भः निग्रहस्थानोपालम्भश्च यत्र भवति तादृशः कः ?
(1) वैतण्डिकः
(2) जल्पः
(3) वादः
(4) न कोऽपि

43. साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानमिति कस्य लक्षणम् ?
(1) वादस्य
(2) जल्पस्य
(3) निग्रहस्थानस्य
(4) जातेः

44. अनुमानप्रामाण्यनिरूपणानन्तरं व्याप्तिनिरूपणे का सङ्गतिः ?
(1) प्रसङ्गः
(2) अवसरः
(3) कार्यैक्यम्
(4) उपोद्घातः

45. साध्यवत्प्रतियोगिकान्योन्या-भावासामानाधिकरण्यमिति व्याप्तेः कतमं लक्षणम् ?
(1) द्वितीयम्
(2) तृतीयम्
(3) चतुर्थम्
(4) प्रथमम्

46. साध्याभावाधिकरणवृत्यभावश्च तादृश वृत्तित्वसामान्याभावः कथं विवक्षितः ?
(1) वह्निमान् धूमादित्यत्र दोषवारणाय
(2) अव्याप्यवृत्तिसाध्यकेऽव्याप्तिवारणाय
(3) धूमवान् वह्नेरित्यत्रातिव्याप्तिवारणाय
(4) असम्भववारणाय

47. घटान्योन्याभाववान् पटत्वादित्यत्र साध्याभावः कः ?
(1) घटः
(2) घटान्योन्याभावत्वम्
(3) घटत्वम्
(4) घटान्योन्याभावः

48. घटत्वात्यन्ताभावस्य अभावः किं स्वरूपः ?
(1) प्रतियोगिस्वरूपः
(2) प्रतियोगितावच्छेदकस्वरूपः
(3) उभयस्वरूपः
(4) अनुभयस्वरूपः

49. साध्यवद्भिन्नसाध्याभाववदवृत्तित्वमित्यत्र प्राचीनमते साध्यवद्भिन्नत्वं कुत्र विशेषणम् ?
(1) साध्ये
(2) साध्याभावे
(3) साध्याभावाधिकरणे
(4) न कुत्रापि

50. माथुरी-पञ्चलक्षणी इति मूलग्रन्थकारः कः ?
(1) मथुरानाथः
(2) गङ्गेशः
(3) गदाधरः
(4) जगदीशः

51. व्याप्तिचतुर्थलक्षणे साकल्यं कस्य विशेषणम् ?
(1) साध्याभाववतः
(2) साध्यस्य
(3) साध्याभावस्य
(4) अभावस्य

52. कपिसंयोगी एतद्वृक्षत्वादित्यत्र साध्यं किम् ?
(1) संयोगः
(2) संयोगत्वम्
(3) कपिसंयोगः
(4) कपिसंयोगी

53. इदं वाच्यं ज्ञेयत्वादित्यत्र कस्य व्याप्ति-लक्षणस्याव्याप्तिः ?
(1) प्रथमस्य
(2) द्वितीयस्य
(3) चतुर्थस्य
(4) सर्वस्य

54. मङ्गलस्य विघ्नध्वंस एव फलमिति कः वदति ?
(1) नवीननैयायिकः
(2) प्राचीननैयायिकः
(3) उभयनैयायिकः
(4) न कोऽपि


09

55. यत्र मङ्गलं नास्ति समाप्तिस्तु जाता तत्र अधोदर्शितेषु किमस्ति ?

(1) अन्वयव्यभिचार:

(2) अन्वयव्यतिरेकव्यभिचार:

(3) व्यतिरेकव्यभिचार:

(4) व्यतिरेकसहचार:

56. शक्ति: स्वतन्त्र: पदार्थ इति क: स्वीकरोति ?

(1) नव्यनैयायिक:

(2) प्राचीननैयायिक:

(3) जरन्नैयायिक:

(4) मीमांसक:

57. द्रव्यत्वजातिसिद्धौ किं प्रमाणम् ?

(1) प्रत्यक्षम्

(2) शब्द:

(3) अनुमानम्

(4) उपमानम्

58. महर्षिणा कणादेन कण्ठत: कति गुणा: उक्ता: ?

(1) 24

(2) 17

(3) 16

(4) 10

59. नित्यत्वे सति अनेकसमवेतत्वमित्यत्र यदि समवेतत्वं नोच्यते तदा कुत्र दोष: ?

(1) संयोगे

(2) अत्यन्ताभावे

(3) गगनपरिमाणे

(4) गगने

60. विनाश्यभाव: क: भवति ?

(1) अन्योन्याभाव:

(2) प्रध्वंसाभाव:

(3) प्रागभाव:

(4) अत्यन्ताभाव:

61. अभाव: अधिकरणस्वरूप एव इति कस्य मतम् ?

(1) प्रभाकर:

(2) गङ्गेश:

(3) गदाधर:

(4) जगदीश:

62. नित्यद्रव्यभिन्नानां साधर्म्यं किम् ?

(1) कारणत्वम्

(2) भूतत्वम्

(3) मूर्तत्वम्

(4) आश्रितत्वम्

63. कार्यद्रव्यनाश: कथं भवति ?

(1) समवायिकारणनाशात्

(2) असमवायिकारणनाशात्

(3) निमित्तकारणनाशात्

(4) आश्रयनाशात्

64. अव्याप्यवृत्तिक्षणिक विशेषगुणवत्वं कस्य साधर्म्यम् ?

(1) कालस्य

(2) जलस्य

(3) पृथिव्या:

(4) आकाशजीवात्मनो:

65. विशेषगुणवत्वं कस्य साधर्म्यम् ?

(1) भूतात्मनो:

(2) नवद्रव्याणाम्

(3) कालस्य

(4) दिश:

66. आकाशे कति गुणाः भवन्ति ?
(1) पञ्च
(2) षड्
(3) नव
(4) एकादश

67. पीलुपाकवादी कः ?
(1) नैयायिकः
(2) वैशेषिकः
(3) मीमांसकः
(4) बौद्धः

68. स्पर्शशब्दधृतिकम्पैः कस्यानुमितिर्भवति ?
(1) पृथिव्याः
(2) तेजसः
(3) वायोः
(4) आकाशस्य

69. इन्द्रियात्मवादी कः ?
(1) नैयायिकः
(2) चार्वाकः
(3) वैशेषिकः
(4) बौद्धः

70. कतिविधा अनुभूतिः ?
(1) द्विविधा
(2) षड्विधा
(3) त्रिविधा
(4) चतुर्विधा

71. अन्योन्याभावप्रत्यक्षे कस्य योग्यता अपेक्षिता भवति ?
(1) अभावस्य
(2) अधिकरणस्य
(3) भेदस्य
(4) प्रतियोगिनः

72. अनुमितौ व्यापारः कः ?
(1) परामर्शः
(2) व्याप्तिः
(3) पक्षधर्मता
(4) व्याप्तिज्ञानम्

73. पर्वतः वह्निमान् धूमादित्यत्र साध्यतावच्छेदकसम्बन्धः कः ?
(1) समवायः
(2) संयोगः
(3) स्वरूपः
(4) विशेषणता

74. पर्वतः वह्निमान् धूमादित्यत्र समवायसम्बन्धेन वह्निमान् कः ?
(1) पर्वतः
(2) जलह्रदः
(3) वह्नेरवयवः
(4) न कोऽपि

75. दण्डिमान् दण्डिसंयोगादित्यत्र परम्परासम्बन्धेन (स्वाश्रयाश्रयत्वसम्बन्धेन) साध्यतावच्छेदकं किम् ?
(1) दण्डी
(2) दण्डः
(3) दण्डिमत्वम्
(4) दण्डत्वम्

76. प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचित् प्रतियोगितोऽनधिकरणत्वमित्युच्यते तदा को दोषः ?
(1) अव्यात्यवृत्तिसाध्यकेऽव्याप्तिः
(2) प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः
(3) कपिसंयोगाभाववान् आत्मत्वादित्यत्राव्याप्तिः
(4) असम्भवः

77. अनुमितिविरोधित्वं नाम अनुमितितत्करणान्यतर-विरोधित्वमित्यर्थकरणे कुत्र दोषबारणम् ?
(1) बाधे
(2) सत्प्रतिपक्षे
(3) व्यभिचारे
(4) न कुत्रापि

78. वायु: गन्धवान् स्नेहात् इत्यत्र कति हेत्वाभासा: ?
(1) त्रय:
(2) चत्वार:
(3) द्वौ
(4) पञ्च

79. साध्यव्यापकीभूताभावप्रतियोगी इति कस्य लक्षणम् ?
(1) बाधस्य
(2) सत्प्रतिपक्षस्य
(3) स्वरूपासिद्धस्य
(4) विरुद्धस्य

80. पर्वत: वह्निमान् नीलधूमादित्यत्र को दोष: ?
(1) व्यभिचार:
(2) साधनाप्रसिद्धि:
(3) साध्याप्रसिद्धि:
(4) आश्रयासिद्धि:

81. शाब्दबोधे व्यापार: क: ?
(1) पदम्
(2) पदज्ञानम्
(3) पदार्थस्मृति:
(4) पदार्थ:

82. मुक्तावल्यांपदं कतिविधम् ?
(1) त्रिविधम्
(2) द्विविधम्
(3) अनन्तम्
(4) चतुर्विधम्

83. योगरूढपदस्योदाहरणं किम् ?
(1) पङ्कज:
(2) पाचक:
(3) मण्डलम्
(4) उद्भिद्

84. शाब्दबोधे इदं कारणं न भवति –
(1) आकाङ्क्षाज्ञानम्
(2) योग्यताज्ञानम्
(3) तात्पर्यज्ञानम्
(4) सादृश्यज्ञानम्

85. ज्ञानगतं प्रामाण्यं परत: गृह्यते इति कस्य मतम् ?
(1) प्रभाकरस्य
(2) मुरारिमिश्रस्य
(3) नैयायिकस्य
(4) कुमारिलभट्टस्य

86. वैशेषिक: शब्दस्य कस्मिन् प्रमाणे अन्तर्भावं वाञ्छति ?
(1) प्रत्यक्षे
(2) अनुमाने
(3) स्मृतौ
(4) उपमाने

87. अर्थापत्तिप्रमाणस्य कुत्रान्तर्भाव: ?
(1) अन्वयव्याप्तौ
(2) उपमाने
(3) अन्वयव्यतिरेकव्याप्तौ
(4) अनुमाने

88. अदृष्टस्य आश्रय: क: ?
(1) जीवात्मा
(2) परमात्मा
(3) स्वर्ग:
(4) नरक:

89. जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्मणोः ।
ह्रासदर्शनतो ह्रासः सम्प्रदायस्य मीयताम् ॥
इयं कारिका कस्मिन् स्तबके पठिता ?

(1) प्रथमे
(2) तृतीये
(3) पञ्चमे
(4) द्वितीये

90. न्यायकुसुमाञ्जलिग्रन्थे चतुर्थी विप्रतिपत्तिः का ?

(1) सत्वेऽपि तस्याप्रमाणत्वात्
(2) तत्साधक प्रमाणाभावात्
(3) तदभावावेदकप्रमाणसद्भावात्
(4) अलौकिकस्य परलोक साधनस्याभावात्

91. न्यायकुसुमाञ्जलिग्रन्थे ईश्वरसिद्धिप्रकरणं कस्मिन् स्तबके विद्यते ?

(1) तृतीये
(2) प्रथमे
(3) पञ्चमे
(4) द्वितीये

92. प्लेटोमतानुसारं किमिदं तत्वमात्मनि समाहितं विद्यते ?

(1) तृष्णा
(2) इच्छाशक्तिः
(3) विवेकः
(4) सर्वे

93. इन्द्रियानुभववादस्य जनकः कः ?

(1) जॉन लॉक
(2) स्पिनोज़ा
(3) हेगल
(4) प्लेटो

94. "पूर्णग्रीक" (The Complete Greek) इत्ययमुपाधिः कस्मै दार्शनिकाय प्रदत्तः

(1) सुकराताय
(2) अरस्तूमहाशयाय
(3) प्लेटोमहोदयाय
(4) हेगलनामा दार्शनिकाय

95. मदीयं दर्शनम् आलोचनात्मकम् (Critical) अतीन्द्रियम् (Transeendental) चास्ति इति कः भणति ?

(1) देकार्तः
(2) स्पिनोजा
(3) एरिस्टाटलः
(4) काण्टः

96. उदितेजुहोति, अनुदिते जुहोति, समयाध्युषिते जुहोतीत्यत्र कस्य दोषस्य आशङ्का भवति ?

(1) व्याघातस्य
(2) अनृतस्य
(3) पुनरुक्तस्य
(4) न कस्यापि

97. धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्य विशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्तिःश्रेयसम् अस्मिन् सूत्रे कयोर्मध्ये कार्यकारणभावः ?

(1) शास्त्रनिःश्रेयसयोः
(2) शास्त्रतत्त्वज्ञानयोः
(3) निःश्रेयसतत्त्वज्ञानयोः
(4) द्रव्यादिपदार्थशास्त्रयोः

98. द्रव्यश्रयी अगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति कस्य लक्षणम् ?

(1) द्रव्यस्य

(2) गुणस्य

(3) कर्मण:

(4) सामान्यस्य

99. अधिगमकर्त्तु: बहुविवेकयो: सर्वाधिकमनुप्रयोग: कुत्र भवति ?

(1) शिक्षणे

(2) प्रशिक्षणे

(3) अनुकूलने

(4) प्रबलने

100. शिक्षणप्रक्रियायां प्रबलनस्य नियन्त्रणं क: करोति ?

(1) प्रधानाध्यापक:

(2) छात्र:

(3) अध्यापक:

(4) सर्वे

101. अधिगमस्य "तत्परताया: नियम:" इत्यस्य प्रवर्त्तक: क: ?

(1) गेस्टाल्ट:

(2) वाट्सन:

(3) थार्नडाइक:

(4) हल:

102. कस्य मतानुसारेण अधिगमस्य अष्टौ प्रकाश: भवन्ति ?

(1) थार्नडाइक:

(2) रावर्ट एम. गैने

(3) हल:

(4) स्किनर:

103. अधिगमक्षेत्रसिद्धान्तस्य सम्बन्ध: केन सह विद्यते, तस्य नाम किम् ?

(1) कोलहर:

(2) स्किनर:

(3) कुर्तलेविन:

(4) टालमेन:

104. रूपसंक्रियात्मक-अवस्था कति वर्षपर्य्यन्तं प्रचलति ?

(1) 04-05 वर्षपर्य्यन्तम्

(2) 07-08 वर्षं यावत्

(3) 19-20 वर्षमितम्

(4) 55-56 वर्षं यावत्

105. संवेगोपरि स्वल्पनियन्त्रणं प्रायश: कस्यामवस्थायां दृश्यते ?

(1) बाल्यावस्थायाम्

(2) शैशवावस्थायाम्

(3) किशोरावस्थायाम्

(4) वृद्धावस्थायाम्

106. "किशोरावस्था जीवनस्य कठिनतमो काल:" इति कस्य उक्ति: ?

(1) कोलेस्निक-इत्यस्य

(2) ई किलपैट्रिक-इत्यस्य

(3) थर्स्टन-इत्यस्य

(4) सर्वेषाम्

107. पियाजे महोदयेन "बौद्धिकविकासस्य अवस्था:" संज्ञानपरकदृष्ट्या कति भागे वर्गीकृता: ?

(1) द्वे

(2) तिस्र:

(3) चतस्र:

(4) पञ्च

108. एतेषु कः गेस्टाल्टवादि मनोवैज्ञानिकः ?
(1) वाट्सनः
(2) पावलॉवः
(3) थार्नडाइकः
(4) वरदाईमरः

109. थार्नडाइकमहोदयः उद्दीपक–अनुक्रिया–सम्बन्धं केन स्वरूपेण करोति ?
(1) अधिगमरूपेण
(2) अभिप्रेरणास्वरूपेण
(3) परिपक्वतारूपेण
(4) न केनापि स्वरूपेण

110. एकः छात्रः संस्कृतश्लोकस्य आलोचनात्मिका व्याख्या प्रस्तौति । तस्य अयम् "अधिगमव्यवहारः" कस्मिन् अनुक्षेत्रे आगच्छति ?
(1) संज्ञानात्मक–अनुक्षेत्रे
(2) भावात्मक–अनुक्षेत्रे
(3) मनोगतिक–अनुक्षेत्रे
(4) भावात्मकसंज्ञानात्मकयोः अनुक्षेत्रे

111. जीवनदर्शनस्य निर्माणं कदा भवति ?
(1) शैशवावस्थायाम्
(2) बाल्यावस्थायाम्
(3) किशोरावस्थायाम्
(4) वृद्धावस्थायाम्

112. सांवेगिकव्यवहारे कीदृशं परिवर्तनं भवति ?
(1) हृदयगतिपरिवर्तनम्
(2) श्वसनगतिपरिवर्तनम्
(3) रक्तगतिपरिवर्तनम्
(4) सर्वम्

113. बहुबुद्धिसिद्धान्तस्य प्रवर्त्तकः कः ?
(1) कैटेलमहोदयः
(2) गार्डनरः
(3) थर्स्टनः
(4) स्पीयरमैनमहोदयः

114. "संज्ञानात्मकमूल्याङ्कनम्" इति सिद्धान्तस्य कः प्रवर्त्तकः ?
(1) जेम्स–लांजे
(2) स्कैकटर–सिंगर
(3) कैनन–वार्ड
(4) लेजारस

115. विकासस्य स्वरूपं गुणात्मकं भवति किन्तु वृद्धेः स्वरूपं कीदृशं भवति ?
(1) परिमाणात्मकम्
(2) आभासात्मकम्
(3) संज्ञानात्मकम्
(4) सर्वम्

116. मनोविश्लेषणवादस्य समर्थकः कः ?
(1) सिगमण्ड फ्रायडः
(2) इरिक्सनः
(3) कैटेलः
(4) सर्वे

117. शिक्षणविधौ कः महत्वपूर्णः ?
(1) पाठ्यवस्तु
(2) प्रस्तुतीकरणम्
(3) पाठ्यवस्तु–प्रस्तुतीकरणञ्च
(4) एतेषु न कश्चन

118. शिक्षणविधिः शिक्षणप्रक्रियां ........ क्रमबद्धश्च निर्माणं करोति –
(1) समयबद्धम्
(2) प्रभावशाली
(3) सार्थकम्
(4) छात्रकेन्द्रितम्

119. "सम्प्रेषणम्" कीदृशी प्रक्रिया अस्ति ?

(1) बोधात्मिका

(2) गत्यात्मिका

(3) विरामात्मिका

(4) ज्ञानात्मिका

120. "उच्चैः हसनं (ठहाका) चीत्कारा दिकं वा" कीदृशं सम्प्रेषणं भवति ?

(1) वाण्यात्मकम् (शब्दात्मकम्)

(2) चाक्षुषात्मकम्

(3) स्पर्शात्मकम्

(4) मुखमुद्रात्मकम्

121. कस्मिन् शिक्षणप्रतिमाने छात्राणां पूर्णरूपेण पृच्छात्मकस्वातन्त्र्यं भवति ?

(1) वैज्ञानिकपृच्छाप्रतिमाने

(2) सूचनाप्रक्रमप्रतिमाने

(3) सहकारीअधिगमप्रतिमाने

(4) सम्प्रत्यय-अधिगमप्रतिमाने

122. वैज्ञानिकपृच्छाप्रतिमाने मूल्याङ्कनाय कस्याः प्रयोगः भवति ?

(1) लिखितपरीक्षायाः

(2) मौखिकपरीक्षायाः

(3) प्रयोगात्मकपरीक्षायाः

(4) न कस्यापि

123. कीदृशी प्रणाली स्थिरा (Static) अनम्या (Rigid) च भवति ?

(1) मुक्तप्रणाली

(2) अनावृत्तप्रणाली

(3) मुक्त, अनावृत्त द्वे प्रणाली

(4) एतासु न काचित्

124. अधोदर्शितेषु एकस्मिंन् "प्रणालीउपागमस्य" उपयोगः नास्ति -

(1) अनुदेशनप्रणाल्यां सौकर्योत्पादने

(2) विद्यालयप्रबन्धन-प्रशासनयोः प्रभावशालीकरणे

(3) अनवरतरूपेण शिक्षाप्रदाने

(4) मूल्याङ्कनप्रणालीमुपादेयपूर्णकरणार्थे

125. "कठोर-उपागमः" इत्सस्य किं प्रमुखं कार्यं नास्ति ?

(1) ज्ञानस्य संचयीकरणम्

(2) ज्ञानस्य सृजनम्

(3) ज्ञानस्य प्रसारणम्

(4) ज्ञानस्य विस्तारः

126. सूचनायां सञ्चारप्राद्योगिक्याञ्च सम्मिलितः अस्ति -

(1) ई-मेल

(2) इन्टरनेट

(3) शैक्षणिक टी.वी.

(4) सर्वम्

127. आई.सी.टी. इत्यनेन कस्य परिज्ञानं भवति ?

(1) इन्फॉर्मेशन कॉमन टेक्नोलॉजी (Information Common Technology)

(2) इन्फॉर्मेशन एण्ड कम्यूनिकेशन टेक्नोलॉजी (Information and Communication Technology)

(3) इन्टरकनेक्टेड टेक्नोलॉजी (Interconnected Technology)

(4) इन्फॉर्मेशन एण्ड कम्प्यूटर टेक्नोलॉजी (Information and Computer Technology)

128. स्कैनर (Scanner) इति कीदृशमुपकरणं विद्यते ?

(1) इनपुट (Input)

(2) आउटपुट (Output)

(3) प्रोसेसे (Process)

(4) मेमोरी (Memory)

**129.** नव्यन्यायमते न्यायस्य लक्षणं विद्यते –
(1) नीयते–प्राप्यते अर्थसिद्धिरनेन इति न्याय:
(2) प्रमाणैरर्थपरीक्षणं न्याय:
(3) उचितानुपूर्वीक प्रतिज्ञादिपञ्चकसमुदायत्वम्
(4) सर्वाणि लक्षणानि

**130.** द्वादशलक्षणी मीमांसादर्शनस्य किं प्रयोजनम् ?
(1) धर्माधर्मविवेक:
(2) ज्ञानाज्ञानविवेक:
(3) ब्रह्मज्ञानम्
(4) अपवर्ग:

**131.** सुखदु:खाभावौ, तदन्यतरसाधनञ्च कस्य ग्रन्थस्य प्रयोजनम् ?
(1) वेदान्तसार:
(2) वेदान्तपरिभाषा
(3) शाङ्करभाष्यम्
(4) श्रीभाष्यम्

**132.** न्यायसूत्रस्य मुख्यं प्रयोजनं किमस्ति ?
(1) पदार्थज्ञानम्
(2) विषयज्ञानम्
(3) ब्रह्मज्ञानम्
(4) नि:श्रेयसप्राप्ति:

**133.** सांख्यदर्शने अपवर्गस्वरूपं किमस्ति ?
(1) अत्यन्ताभावस्वरूपम्
(2) अन्योन्याभावस्वरूपम्
(3) प्रागभावस्वरूपम्
(4) प्रध्वंसाभावस्वरूपम्

**134.** जैनदर्शने को नाम अधिगम:
(1) व्याख्यानादिरूपपरोपदेशजनितं ज्ञानम्
(2) परोपदेशजनितं ज्ञानम्
(3) व्यवहारादिरूपपरोपदेशजनितं ज्ञानम्
(4) अनुभवादिरूपपरोपदेशजनितं ज्ञानम्

**135.** योगसूत्रस्य द्वितीयपादस्य नाम किम् ?
(1) विभूतिपाद:
(2) कैवल्यपाद:
(3) साधनपाद:
(4) समाधिपाद:

**136.** अन्विताभिधानवादस्य प्रवर्त्तक आचार्य: क: ?
(1) कुमारिलभट्ट:
(2) प्रभाकर:
(3) जैमिनि:
(4) कणाद:

**137.** भारतीयदर्शने प्रस्थानत्रय्यां न गण्यते –
(1) श्रीमद्भगवद्गीता
(2) रामायणम्
(3) उपनिषद्
(4) ब्रह्मसूत्रम्

**138.** अनिर्वचनीयख्याति: कस्याभिमतम् ?
(1) अद्वैतस्य
(2) विशिष्टाद्वैतस्य
(3) सांख्यस्य
(4) नैयायिकस्य

**139.** "लोकायत" इति नाम्ना कस्य व्यवहार: भवति ?
(1) सांख्यदर्शनस्य
(2) चार्वाकदर्शनस्य
(3) बौद्धदर्शनस्य
(4) जैनदर्शनस्य

**140.** अपोहवादस्य प्रवर्त्तक: क: ?
(1) जैन:
(2) मीमांसक:
(3) बौद्ध:
(4) चार्वाक:

141. "प्रयोजनम्" इति कस्मिन् दर्शने पदार्थरूपेण स्वीकृतं विद्यते ?

(1) मीमांसादर्शने

(2) बौद्धदर्शने

(3) वैशेषिकदर्शने

(4) न्यायदर्शने

142. सांख्यदर्शने महत्तत्वस्योत्पत्ति: कस्माद् भवति ?

(1) अहङ्कारात्

(2) पुरुषात्

(3) प्रकृते:

(4) कर्मेन्द्रियात्

143. जीवन्मुक्त: क: भवति ?

(1) तितिक्षु:

(2) युञ्जान:

(3) साधक:

(4) अखिलबन्धरहितो ब्रह्मनिष्ठ:

144. तत्र पृथिव्यादीनि चत्वारि भूतानि इति क: स्वीकरोति ?

(1) आर्हत:

(2) बौद्ध:

(3) चार्वाक:

(4) विशिष्टाद्वैत:

145. सर्वास्तित्ववाद: कस्य मतं विद्यते ?

(1) वैभाषिकस्य

(2) योगाचारस्य

(3) सौत्रान्तिकस्य

(4) माध्यमिकस्य

146. "अव्यपदेश्यम्" इति विशेषणं महर्षिगौतमेन कस्य लक्षणे प्रदत्तम् ?

(1) सामान्यस्य

(2) प्रत्यक्षस्य

(3) संशयस्य

(4) सिद्धान्तस्य

147. अधोदर्शितेषु मध्ये क: बौद्धसम्प्रदाये नैव परिगणित: ?

(1) माध्यमिक:

(2) सौत्रान्तिक:

(3) व्यावहारिक:

(4) वैभाषिक:

148. जैनमते निसर्ग: क: ?

(1) परोपदेशसापेक्षमात्मस्वरूपम्

(2) आप्तोपदेशसापेक्षमात्मस्वरूपम्

(3) आप्तोपदेशनिरपेक्षमात्मस्वरूपम्

(4) परोपदेशनिरपेक्षमात्मस्वरूपम्

149. तर्कसंग्रहग्रन्थस्य रचयिता क: ?

(1) जगदीश:

(2) विश्वनाथ:

(3) अन्नंभट्ट:

(4) गङ्गेश:

150. तेज: किमस्ति ?

(1) पदार्थ:

(2) द्रव्यम्

(3) कर्म

(4) गुण:

रफ कार्य के लिए स्थान / SPACE FOR ROUGH WORK